

# 1 मम प्रियं बिडालम् अन्वेषयत!

## आगच्छत गायाम
















© NCERT not to be republished

आगच्छ त्वम् आगच्छ
मम प्रियबिडाल! आगच्छ
काचपात्रस्य **अधः** विलिखन्
दृष्टः त्वं ननु दृष्टः त्वम्
कारयानस्य **उपरि** क्रीडन्
दृष्टः त्वं ननु दृष्टः त्वम्
प्रियबिडाल! आगच्छ त्वम्







आगच्छ त्वम् आगच्छ
मम प्रियबिडाल! आगच्छ
शिरोवस्त्रस्य **उपरि** कूर्दन्
दृष्टः त्वं ननु दृष्टः त्वम्

संस्तरणस्य **अधः** निगूहन्
दृष्टः त्वं ननु दृष्टः त्वम्

उच्चैः कवितां पठन्तु। बालकान् च साभिनयं कविता-पाठाय पृच्छन्तु। बालकाः चित्राणि दृष्ट्वा वक्तुं शक्नुवन्ति यत् ते किं पश्यन्ति , अपि च अन्यैः छात्रैः सह चर्चां कर्तुं शक्नुवन्ति यत् किं वस्तु अधः, उपरि, बहिः अन्तः वा अस्ति। बालाः स्व-परितः यान् पशून् बिडाल-कुक्कुर-गवादीन् पश्यन्ति तेषां विषये वक्तुं तान् प्रोत्साहयन्तु।



© NCERT not to be republished

## कवितायाः चित्राणि पश्यन्तु, तथा समुचिते शब्दे वर्तुलं कुर्वन्तु।


क. रक्तः कन्दुकः शय्यायाः **उपरि/ अधः /अन्तः** अस्ति।
ख. बिडालः यानस्य **अन्तः/बहिः/उपरि** अस्ति।
ग. पुरुषः वृक्षस्य **अधः/अन्तः/उपरि** शयानः अस्ति।
घ. गौः गृहस्य **अन्तः/उपरि/बहिः** अस्ति।

## विचिन्त्य उत्तरं वदत -

क. भवन्तः उपानहं कुत्र स्थापयन्ति ? कक्षस्य अन्तः/बहिः ।
ख. भवन्तः अवकरं कुत्र क्षिपन्ति ? अवकरकण्डोलस्य अन्तः/बहिः ।

## एहि क्रीडाम — वस्तूनि अन्वेषयाम

बालकान् गणद्वये स्थापयन्तु। एकः गणः सुधाखण्डं रक्तकन्दुकम् इत्यादीनि कतिपयानि वस्तूनि गोपयति, अन्यः गणः च तानि अन्वेषयति। अन्तः/बहिः, दूरं/समीपं, उपरि/अधः इत्यादीनां शब्दानां उपयोगेन वस्तूनि अन्वेष्टुं बालकेभ्यः मौखिकनिर्देशं दातुं शक्नुवन्ति।



उदाहरणार्थम्:

क) श्वेतवस्तु अन्वेषयन्तु यत् फलकस्य **समीपं** पीठिकायाश्च **अधः** अस्ति।
ख) रक्तवस्तु अन्वेषयन्तु यत् कक्षायाः **बहिः** वृक्षस्य च **अधः** अस्ति।

© NCERT not to be republished


## एहि क्रीडाम - कन्दुकं क्षिपाम !


प्रत्येकमपि बाल: करण्डे कन्दुकं क्षेप्तुं प्रयासं करिष्यति। यदा कन्दुकं करण्डस्य अन्तः पतिष्यति तदा बाला: **'अन्तः'** इति यदा च **बहिः** पतिष्यति तदा 'बहिः' इति वदिष्यन्ति ।



## एहि करवाम

क) अन्तः स्थितानि वस्तूनि ✓ इत्यनेन चिह्नेन चिह्नितानि कुर्वन्तु।





क्रियाकलापाः तथा कारणीयाः यथा सर्वेऽपि बालाः (विशेष-योग्यतायुक्ताः अपि बालाः) सक्रियाः स्युः। उदाहरणार्थं *किंकिणीं* कन्दुके बद्धुं शक्यते अथवा करण्डस्य अन्तस्तलं बहिस्तात् पृथक् कर्तुं शक्यते,येन कन्दुकपतन-ध्वनिना एतत् ज्ञातुं शक्यते यत्, कन्दुकं अन्तः पतितं बहिः वा ।



© NCERT not to be republished

ख) बहिः स्थितानि वस्तूनि ✓ इत्यनेन चिह्नेन चिह्नितानि कुर्वन्तु।





(ग) चित्रं पश्यन्तु समुचितं शब्दं च ✓ इत्यनेन चिह्नेन चिह्नितं कुर्वन्तु।

(i) बालकः वृक्षस्य **उपरि** / वृक्षस्य **अधः** उपविष्टः अस्ति।

(ii) पक्षिणः वृक्षस्य **उपरि** / **अधः** सन्ति।



घ) नासिकायाः अधः स्मितं कुर्वतः मुखस्य चित्रं निर्मान्तु। नेत्रयोः उपरि भ्रूनिर्माणं च कुर्वन्तु।



© NCERT not to be republished

ङ) अस्माकं राष्ट्रियध्वजं पश्यन्तु यच्च **'त्रिवर्णः'** इति नाम्नाऽपि ख्यातः। तत्र कति वर्णाः सन्ति?

सम्यग् विकल्पं चिन्वन्तु ✓

i. त्रिवर्णे *ध्वजे* **उपरि** कः वर्णः अस्ति ?

**श्वेतः/ केसरः/ हरितः**

ii त्रिवर्णे ध्वजे श्वेतवर्णस्य **अधः** कः वर्णः अस्ति ?

**पाटलः/केसरः/हरितः**

iii त्रिवर्णे ध्वजे हरितवर्णस्य **उपरि** कः वर्णः अस्ति ?

**श्वेतः:/केसरः/पीतः**

iv त्रिवर्णे *ध्वजे अशोकचक्रं* कुत्र अस्ति ?

**कोणे/मध्ये/एकस्मिन् पार्श्वे**



बालकैः सह चर्चा करणीया यत् वयं कदा कुत्र किमर्थं च राष्ट्रियध्वजम् उत्तोलयाम? इति। राष्ट्रिय-उत्सवानां विषये स्वीयान् अभिप्रायान् प्रकटीकर्तुं बालकाः प्रेरणीयाः। *त्रिवर्णं ध्वजं* निर्मातुम्, *त्रिवर्णं ध्वजम्* अभिमुखीभूय उत्थाय च राष्ट्रगानं कर्तुं बालकाः सूचनीयाः।

© NCERT not to be republished

## छुक्-छुक् गच्छति रेलयानम्

छुक्-छुक् गच्छति रेलयानम्
छुक्-छुक् गच्छति रेलयानम्
पर्वतोपरि अधःक्षेत्रे
चलति अस्मद् रेलयानम्
छुक्-छुक् गच्छति रेलयानम् ।
मम यानस्य **पुरतः** यानानि
मम यानस्य **पृष्ठतः** यानानि
सदैव तिष्ठन्ति क्रमानुसारम्
छुक्-छुक् गच्छति रेलयानम्।
नदीनामुपरि वर्षासु वा
चलति अस्मद् रेलयानम्
छुक्-छुक् गच्छति रेलयानम् ।



© NCERT not to be republished

क. रेलयाने यन्त्रस्य (engine) **पृष्ठतः** कति यानानि (Boggies) सन्ति ?

ख. रेलयाने रक्तवर्णीय-यानस्य **पुरतः** कति यानानि सन्ति ?

ग. रक्तयानस्य **पृष्ठतः** विद्यमानं यानं **नारङ्गवर्णेन** रज्यन्तु ।

घ. रक्तवर्णीय-यानस्य **पुरतः** विद्यमानं यानं **नीलवर्णेन** रज्यन्तु ।

बालकान् स्वस्य रेलयात्रायाः अनुभवान् प्रकटयितुं वदन्तु। ये बालकाः कदापि रेलयानेन न गतवन्तः ते यात्रायाः विषये प्रश्नान् प्रष्टुं शक्नुवन्ति । 'रेलयानं किम्' इति विषये कक्षायां चर्चा भवतु । कर्गदपत्रे रेलयानं चित्रयितुं छात्रान् वदन्तु अथवा उपयुक्तपेटिकानां मञ्जूषा-इत्यादीनाम् अपशिष्टसामग्रीणां साहाय्येन ते रेलयानं निर्मातुमपि शक्नुवन्ति ।



## एहि क्रीडाम

बालाः कवितां गास्यन्ति क्रीडिष्यन्ति च । एका क्रीडा यत्र ते सर्वे अन्योऽन्यस्य स्कन्धं धृत्वा रेलयानं निर्मास्यन्ति। रेलयाने प्रत्येकमपि बालकस्य पुरत: पृष्ठत: च कः अस्ति इति ते सर्वे वदिष्यन्ति।




सुवाली रोहितश्च कांश्चन वस्तुसमूहान् निर्मान्ति।





बालकानां कृते बीजानि, पर्णानि, मुक्ता: इत्यादीनां वस्तूनां पृथक्करणगतिविधीन् निर्दिशन्तु।



## एहि करवाम

सुवाली सर्वान् कुड्मलान् त्रिषु समूहेषु अस्थापयत्।



सुवाली किमर्थम् एतादृशान् समूहान् अकरोत् ?

एतान् कुड्मलान् चित्रयित्वा अन्यक्रमेषु योजयितुं सुवाल्याः सहायतां कुर्वन्तु ।

© NCERT not to be republished



## परियोजनाकार्यम्

बालकान् कक्षायां विद्यमानां कपाटिकां व्यवस्थापयितुं वदन्तु। स्थितिशब्दकोशस्य (Positional vocabulary) उपयोगेन वस्तूनि स्थापयितुं वदन्तु, यथा अधः स्थिते आधाने द्वे वस्तुनी स्थापयन्तु उपरिस्थिते आधाने च एकं वस्तु स्थापयन्तु इत्यादि।